# Shri Navadurga Stavah

# श्रीनवदुर्गा स्तवः

## Document Information

Text title : navadurgAstavaH

File name : navadurgAstavaH.itx

Category : devii, devI, durgA, nava

Location : doc_devii

Proofread by : NA

Latest update : September 23, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

July 23, 2021

*sanskritdocuments.org*

# श्रीनवदुर्गा स्तवः

कार्येण याऽनेकविधां श्रयन्ती, निवारयन्ती स्मरतां विपत्तीः ।
अपूर्वकारुण्य रसार्द्र चित्ता, सा शैलपुत्री भवतु प्रसन्ना ॥ १॥

स्वर्गोऽपवर्गो नरकोऽपि यत्र, विभाव्यते दृक्कलया विविक्तम् ।
या चाऽद्वितीयाऽपि शिवद्वितीया, सा ब्रह्मचारिण्यवताद् भवेभ्यः ॥ २॥

पादौ धरित्री कटिरन्तरिक्षं, यस्याः शिरो द्यौरुदिताऽऽगमेषु ।
अन्यद्यथा योगमयोग दूरा, सा चन्द्रघण्टा घटयत्वभीष्टम् ॥ ३॥

स्वराड् विराड् संसृतिराड् अखण्डब्रह्माण्डभाण्डाकलनैकवीरा ।
सा पापविध्वंसनसद्म कूष्माण्डाऽव्याद् अपायादयदानशौण्डा ॥ ४॥

द्वैमातुरत्वे द्विरदाननस्य, षाण्मातुरत्वे च कुमारकस्य ।
एकैव माता परमा मता या, सा स्कन्दमाता मुदमादधातु ॥ ५॥

कतस्य गोत्रादथवाऽपरस्मात्, किं वेतरस्मात् कथमेकिकैव ।
जातेति माताह्वयतां इता या, कात्यायनी सा ममतां हिनस्तु ॥ ६॥

कालोऽपि विश्रान्तिमुपैति यस्यां, काऽन्या कथा भौतिकविग्रहाणाम् ।
प्रपञ्च पञ्चीकरणैकधात्री, सा कालरात्री निहताद् भयानि ॥ ७॥

कालीकुलं श्रीकुलमप्यपारं, कृष्णाद्युपासा प्रवणं यतश्च ।
साऽनन्तविद्या विततावदाना, गौरी विदध्यादखिलान् पुमर्थान् ॥ ८॥

गृणन्ति यां वेदपुराणसाङ्ख्य, योगागमादेव महर्षयश्च ।
पुत्रान् प्रपौत्रान् सुधियः श्रियश्च, सा सिद्धिदा सिद्धिकरी ददातु ॥ ९॥

या चण्डी मधुकैटभप्रमथिनी या माहिषोन्मूलिनी,
या धूम्रेक्षणचण्डमुण्ड दलिनी या रक्तबीजाशिनी ।
शक्तिः शुम्भनिशुम्भदैत्यदलिनी या सिद्धि लक्ष्मीः परा
सा दुर्गा नवकोटि मूर्तिसहिताऽस्मान् पातु सर्वेश्वरी ॥ १०॥

इति श्रीनवदुर्गास्तवः सम्पूर्णः ।

*Shri Navadurga Stavah*

pdf was typeset on July 23, 2021

Please send corrections to *sanskrit@cheerful.com*